## संस्कृत-वार्ताः

**दिनाङ्क :- 16/12/2025** **सायम् - 06:20**

**आदौ मुख्यवार्ता:**

- प्रधानमन्त्री नरेन्द्रमोदी, जोर्डन-देशस्य राजा अब्दुल्ला द्वितीयश्च संयुक्तरूपेण अम्मान्-नगरे भारत-जोर्डन-वाणिज्य-मञ्चं सम्बोधितवन्तौ, द्वयोः राष्ट्रयोर्मध्ये आर्थिकसहयोगस्य परिवर्तनदिशि महत्त्वाकांक्षी-योजनाश्च निरूपितवन्तौ।
- भारतं, जोर्डनदेशश्च प्रमुखेषु क्षेत्रेषु बहुविध-सहमतिपत्रेषु हस्ताक्षराण्यपि कृतवन्तौ।
- केन्द्रीयकृषिमन्त्री शिवराजसिङ्हचौहानः विकसितभारत-वृत्ति- प्रतिभूतिः अथ आजीविकाभियानम् (ग्रामीण) इति विधेयकं लोकसभा-सदनपटले अस्थापयत्, येन ग्रामीण-वृत्तेः मूलसौकर्याणां च वर्धनम् भविष्यतीति अपेक्षते।
- निर्वाचनायोगः पश्चिमबङ्गालराज्ये निर्वाचक-सूचीं प्रकाशयति; अनुपस्थित्या, स्थानान्तरणेन, मृत्युना प्रतिरूपणेन वर्धितानां अष्टपञ्चाशल्लक्षतोऽधिकानि नामानि निष्कासितानि।

**अपि च,**

- भारत-यू. ए. ई. देशौ भारत-मध्यपूर्व-यूरोप् आर्थिक-मार्गं प्रति प्रतिबद्धतां पुनः दृढीकर्तुं वैश्विक-दक्षिणाय सहकारं सुदृढं कर्तुम् च सहमतिम् प्रकटितवन्तौ।

**जोर्डन प्रधानमंत्री**

प्रधानमन्त्री श्रीनरेन्द्रमोदी जॉर्डनस्य च किंग-अब्दुल्ला-द्वितीयः अद्य अम्माने आयोजितं भारत-जॉर्डन-वाणिज्य-मञ्चं संयुक्तरूपेण सम्बोधितवन्तौ। द्वापि नेतारौ द्वयोर्देशयोर्मध्ये आर्थिकसहयोगार्थं नूतनान् आयामान् प्रदातुं महत्त्वाकाङ्क्षीयोजनानां रूपरेखां प्रस्तुतवन्तौ। अत्र च द्वयोः पक्षयोः प्रमुखवाणिज्यिकप्रतिनिधयः भागं गृहीतवन्तः।

राजा अब्दुल्ला अवदत् यत् वाणिज्यकार्यक्रमस्य माध्यमेन महत्त्वपूर्णक्षेत्रेषु सहभागिता-संयुक्तनिवेशादिविषयेषु च चर्चावसराः प्रादुर्भूताः। राजा अब्दुल्ला प्रधानमन्त्रिणः मोदिनः स्वागतं कुर्वन् अकथयत् यत् अहम् आशान्वितोस्मि यत् अद्य याः पारस्परिकचर्चाः सञ्जाताः ताभिः जार्डन-भारतयोर्मध्ये आर्थिकनिवेशः सहयोगः च वर्धिष्यते। प्रधानमन्त्रिणः मोदिनः नेतृत्वे भारतदेशेन प्रभूतो विकासः कृतः अपि च द्वयोः देशयोः आर्थिकसहभागितया इतोपि आर्थिकम् औन्नत्यं द्वयोः देशयोः भविष्यति, एतदर्थञ्च द्वापि तत्परौ स्तः।

प्रधानमन्त्री मोदी स्वीये सम्बोधने भारत-जार्डन-देशयोः पारस्परिकसम्बन्धाः अप्रतिमाः सन्ति, अपि च पृथक्-प्रकृतिकाः सन्ति, यत्र च ऐतिहासिको विश्वासः भविष्यस्य च आर्थिक-अवसराः समप्रकृति-युक्ताः सन्ति, अत्र च आर्थिकावसराः समानरूपेण प्राप्यन्ते। प्रधानमन्त्रिणा मोदिना प्रोक्तं यत् भारतदेशः जार्डनदेशस्य तृतीयः बृहत्तमः वाणिज्यिकसहभागी वर्तते।

एतस्य वाणिज्यिककार्यक्रमस्य अन्तर्गतं भारतीय-जार्डन-वाणिज्यिक-सङ्घटनानां मध्ये नैकेषु सन्धिपत्रेषु ज्ञापनेषु चापि हस्ताक्षराणि भविषन्यन्तीति सम्भाव्यते। वाणिज्यिकमंचानन्तरं प्रधानमन्त्री मोदी क्राउनप्रिंसहुसैनबिन-अब्दुल्लावर्येण सह जार्डन-संग्रहालयस्यापि भ्रमणम् अकरोत्।

**भारत-मध्यपूर्व यूरोप**

भारत-यू. ए. ई. देशौ भारत-मध्यपूर्व-यूरोप् आर्थिक-मार्गं प्रति प्रतिबद्धतां पुनः दृढीकर्तुं वैश्विक-दक्षिणाय सहकारं सुदृढीकर्तुम् सहमतिम् प्रकटितवन्तौ।

**विराम**

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। **सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in** इत्यत्र, **अथ newsonair** चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।

**प्रधामन्त्री श्रीनरेन्द्रमोदिनः इथियोपिया –दिवसः –**

देशत्रयस्य यात्रावधेः द्वितीयचरणे प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य सांयकाले इथियोपियायाः राजधान्याम् अदीस-अबाबा इत्यत्र प्राप्स्यति। द्विदिवसीययात्रायां प्रधानमन्त्री इथियोपियादेशं प्रति गच्छति, तत्र सः प्रधानमन्त्री डॉ.अबी-अहमद-अलिना सह भारत-इथोपिया-देशयोः द्विपक्षीय-सम्बन्धानां सर्वेषु पक्षेषु व्यापकचर्चां करिष्यति। प्रधानमन्त्रिणः श्रीमोदिनः इयम् इथोपियादेशस्य प्रथमा यात्रा अस्ति, यत्र च श्रीमोदी इथियोपियादेशस्य संसदः संयुक्तसत्रमपि सम्बोधयिष्यति।

**प्रेसिडेंट-द्रौपदी-मरमू-इनाग्रेटेड-परम-वीरः**

अद्य विजयदिवसस्य अवसरे राष्ट्रपतिभवने राष्ट्रपतिः परमवीर- दीर्घायाः उद्घाटनम् अकरोत्। एतस्यां दीर्घायां परमवीरचक्रेण सम्मानितानाम् एकविंशतिविजेतृणां चित्राणि प्रदर्शितानि सन्ति। प्रदर्शन्याः उद्देश्यम् , आगन्तुकानां जनानां हृदयेषु अस्माकं परमवीराणां नायकानां कृते श्रद्धाभावस्य आधिक्येन जागरणमिति वर्तते। एते वीराः राष्ट्रस्य रक्षायाम् अदम्य-संकल्पस्य अदम्यसाहस्य चापि प्रदर्शनं कृतवन्तः सन्ति। एतस्मिन् अवसरे रक्षामन्त्री राजनाथसिंहः, रक्षादलप्रमुखः अनिलचौहानः, स्थलसेनाप्रमुखः उपेन्द्रद्विवेदी, अन्ये चापि गणमान्यजनाः समुपस्थिताः आसन्।

**मथुरा-बृहद् दुर्घटनाः**

उत्तरप्रदेशे अद्य प्रातःकाले मथुरानगरे अनेकेषां बस्-यानानां सञ्जातसंघट्टात्मिकायां दुर्घटनायां त्रयोदश-जनाः मृताः, सप्ततितोऽधिकाश्च जनाः व्रणिताः अभवन्। घनीभूत-कुज्झघटिकया दुर्घटनैषा मथुरा-नगरस्य बलदेव-क्षेत्रे यमुना-द्रुतमार्गस्योपरि

अभवत्, सञ्जातसंघट्टेऽस्मिन् वाहनेषु अग्निप्रकोपश्च अजायत्। स्थानीय-आरक्षिबलेन मण्डल-प्रशासनेन च आपदुद्धारकार्यं जवेन समारब्धम्। प्रधानमन्त्री नरेन्द्रमोदी अद्य यमुना-द्रुतमार्गस्य दुर्घटनायां मृतानां जनानां विषये दुःखम् प्रकटितवान्। प्रधानमन्त्री-कार्यालयेन प्रत्येकं मृतकस्य निकटवर्तिने सम्बन्धिने प्रधानमन्त्री-राष्ट्रिय-सहाय्य-कोषात् द्विलक्षरूप्यकाणां अनुग्रहधनस्य घोषणा कृता । उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः मृतकानां शोकाकुलपरिवारान् प्रति शोकसंवेदनाः प्रकटितवान्। सः मृतकपरिवारेभ्य: प्रत्येकम् द्विलक्षरूप्यकाणां, क्षतीभूतेभ्यश्च पञ्चाशत्सहस्र-रूप्यकाणां आर्थिकसहाय्यस्य घोषणाम् अकरोत्।

## पश्चिमबंगाल एसाईआर

पश्चिमबङ्गालराज्ये एस. आई. आर. मतदातृ-संशोधन-प्रक्रियायाम् अनुपस्थित्या, स्थानान्तरणेन, मृत्युना प्रतिरूपेण वर्धितानां अष्टपञ्चाशल्लक्षतोऽधिकानि नामानि निष्कासितानि प्रारूप-मतदातृ-सूची .च प्रकाशिता। एस. आई. आर. इत्यस्य प्रथमचरणान्तर्गतं पश्चिमबङ्गालराज्ये आहत्य सार्धसप्त-कोटितोऽधिकाः मतदातारः आसन् ।

## लोकसभा-आजीविका-मिशनः

लोकसभायामद्य वृत्ति-आजीविका-मिशन इत्यस्य कृते विकसितभारत-प्रतिभूति-विधेयक-द्विसहस्र-पञ्चविंशतिः, इत्यस्य प्रस्तुतिः जाता। अयं हि विधेयकः विंशतिवर्षपुरातनस्य महात्मगान्धी-राष्ट्रिय-ग्रामीण-रोजगार-गारण्टी-अधिनियमः पंचाधिकद्विसहस्रं इत्यस्य स्थाने सम्प्रति प्रवर्तयिष्यते। केन्द्रीय-कृषि-मन्त्री शिवराजसिंहचौहानः विकसितभारतं सप्तचत्वारिंशदधिक-द्विसहस्रानुरूपम् एकस्या: आधुनिक-वैधानिक-संरचना-स्थापनायै विधेयकं प्रस्तुतवान्, एतस्य अन्तर्गतं तेभ्यः ग्रामीण-परिवारेभ्यः पंचविंशत्यधिक-शतं दिनानां श्रमिक-वृत्ति-आजिविका निश्चयेन प्रदीयते तत्र च अकुशलाः वयस्काः श्रमिकाः स्वेच्छया शारीरिकश्रमार्थं अग्रेसराः भवन्ति, श्रीचौहानः अवदत् यत् प्रधानमन्त्रिणः श्रीनरेन्द्रमोदिनः नेतृत्वे निर्धनानाम् उत्थानाय नैकाः कल्याणकारिण्यः महत्त्वपूर्णाः योजनाः क्रियापथे आनीयन्ते।

विधेयकस्य प्रस्तुतिकाले कांग्रेस-डीएमके-टीएचआईसी-सहितानां नैकेषां विपक्षिदलानां सदस्याः विधेयकस्यास्य विरोधं कृतवन्तः, ते विपक्षिसदस्याः सदनं बलात् प्रविष्टवन्तः अपि च विधेयकं प्रतिस्वीकर्तुं प्रचण्डअभ्यर्थनां कुर्वन्तः विरोधस्वरघोषान् अपि कृतवन्तः ।

## ऐ एम् डी ऋतुः

भारत-ऋतु-विभागेन श्वस्तनं यावत् उत्तरप्रदेशे, मध्यप्रदेशे च अतीव घनीभूत-कुहुकाच्छादनस्य पूर्वानुमानं कृतमस्ति। दिल्ली, पञ्जाब, हरियाणा, चण्डीगढ, पूर्वोत्तरभारतस्य च कतिपय- क्षेत्रेषु आगामि-दिनद्वये प्रातःकाले अल्प-कुहुक: भवितुमर्हतीति विभागेनानेनोक्तम् । अद्य अण्डमान्-निकोबार्-द्वीपेषु विद्युद्वेगेन सह मेघगर्जनपुरस्सरं, मरिनार्-अखातस्य समीपस्थेषु कोमोरिन्-क्षेत्रेषु च झञ्झावातस्य स्थितिः भवितुम् अर्हति इति ऋतु-विभागेन पूर्वानुमानं कृतम् अस्ति।

